# PANCHSHEEL PUBLIC SCHOOL

10+2 Senior Secondary School (Affiliated & Recognized by CBSE)
Jaitpur, Badarpur, New Delhi-44

## REVISION PAPER

## SESSION 2023-24

**Time:** **Subject: SANSKRIT** **Class: VIII** **Date:** **M. Marks: 50**

खण्ड 'क' अपठित अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत। ( 6अंक)

एकदा चत्वारः ब्राह्मण कुमाराः आसन्। तेषां त्रयः शिक्षां प्राप्य विद्वांसः अभवन् परम् एकः निरक्षरः एवं अतिष्ठत् । विद्यां प्राप्य त्रयः कुमाराः अहंकारिणः अभवन्। यत्किञ्चिदपि कर्म सहसैव विचारं विना एव अकुर्वन् ।निरक्षरः च कुमारः सर्वदा सहजबुद्धया विचार्य एव कार्यं करोति स्म । एकदा धनं गच्छन्तः ये एकस्य सिंहस्य अस्थिपञ्जरम् अपश्यन् ।त्रयः विद्वांसः कुमाराः हर्षिताः अभवन् अवदन् च – " वयम् एतम् सिंहं जीवितं करिष्यामः । अस्माकं विद्यायाः कौशलस्य उत्तमं परीक्षणं भविष्यति ।" निरक्षरः बालः तान् निवारितवान् परं विद्यादर्पेण अभिमानिनः ते न अश्रृण्वन्। अन्ततः जीवितः सिंहः तान् विदुषान् कुमारान् एव अखादत् । निरक्षरः कुमारः वृक्षम् आरुह्य स्वप्राणान् अरक्षत्। अतः कथ्यते – " विद्यायाः बुद्धिरुत्तमा।"

अ) एकपदेन उत्तरत –

1. अस्थिपञ्जरः कस्य आसीत् ?
2. चतुर्थः कुमारः कीदृशः आसीत्?

आ) पूर्णवाक्येन उत्तरत –

1. अस्थिपञ्जरं दृष्ट्वा विद्वांसः कुमाराः किम् अवदन् ?

इ) निर्देशानुसारम् उत्तरत –

1. 'कुमाराः' इति पदस्य विशेषणं किम् ?
   क. त्रयः ख. विद्वांसः ग. हर्षिताः घ. चत्वारि एव पदानि
2. 'अखादत्' इति क्रियायाः कर्तृपदं किम् ?
   क. जलम् ख. वायुः ग. वृक्षाः घ. मृत्तिकाः

ई) गद्यांशस्य उपयुक्तं शीर्षकं देयम् ।

खण्ड 'ख' रचनात्मकं कार्यम्

2. विद्यालयात् अवकाशार्थं प्राचार्यां प्रति अधोलिखितं पत्रं मञ्जूषातः उचितपदानि गृहीत्वा पूरयत। (5 अंक)

सेवायाम्, दिनांकः ------------

मान्याः प्राचार्या,

कुलाची- हंसराज- माडल विद्यालयः

अशोक- विहारः, दिल्ली।

महोदया,

सविनयं (1)----------- इदम् अस्ति यत् (2)------------- अहं ज्वरेण (3)--------- अस्मि। ज्वरकारणात् अहं (4)---------- आगन्तुम् असमर्थः अस्मि। कृपया माम् (5) ------------ अवकाशं प्रदाय अनुग्रहणन्तु।

भवदीय: शिष्य:

अनुज:

(कक्षा – अष्टमी )

3. चित्रं दृष्ट्वा मञ्जूषात: पदानि च गृहीत्वा संस्कृते पञ्च वाक्यानि रचयत। (5 अंक)



मञ्जूषा – वर्षाकाल:, शिशु:,उद्यानम्, युवती,महिला, पुरुष:,आतपत्राणि, आनन्दम्,मार्ग:, जलम्।

4. अधोलिखितवाक्यानां संस्कृत भाषायाम् अनुवादं कुरुत। (4 अंक)

क. पन्ना का बलिदान इतिहास में अमर है।

ख. हम महाभारत देखने जा रहे हैं

ग. पिताजी कार्यालय से आकर विश्राम करते हैं।

घ. हम सबको पर्यावरण की रक्षा करनी चाहिए।

खण्ड 'ग' अनुप्रयुक्त व्याकरणम्

5. निर्देशानुसारम् शब्दरूपाणि चिनुत। (3 अंक)

क. मुनि पदस्य सप्तमी विभक्ति बहुवचनं किम् ?

1. मुनय: 2. मुनिना 3. मुने: 4. मुनिषु

ख. राजन् पदस्य षष्ठी विभक्ति द्विवचनं किम् ?

1. राजा 2. राज्ञ: 3. राज्ञे 4. राज्ञो:

ग. अस्मद् पदस्य तृतीया विभक्ति बहुवचनं किम् ?

1. वयम् 2. अस्माभि: 3. अस्माकम् 4. मम

6. निर्देशानुसारम् धातुरूपाणि चिनुत। (3 अंक)

क. लभ् धातु,लट् लकार, प्रथम पुरुष, द्विवचनं।

1. लभेते 2. लभध्वे 3. लभे 4. लभते

ख. वद् धातु, लङ् लकार, मध्यम पुरुष, द्विवचनं।

1. अवदतम् 2. अवदम् 3. अवद: 4. अवदन्

ग. दा धातु, लृट् लकार, प्रथम पुरुष, एकवचनं।

1. दास्यसि 2. दास्यामि 3. दास्यति 4. दास्यन्ति

7. अधोलिखितानां पदानां पर्यायपदं लिखत । (2 अंक)

क. माता

ख. गज:

ग. सिंह:

घ. कमलम्

8. अधोलिखितानां पदानां विलोमपदं लिखत । (2 अंक)

क. कीर्तिः -

ख. जीवनम् –

ग. सुपुत्रः -

घ. उदयः -

9. संस्कृत संख्यावाचकपदैः रिक्तस्थानानि पूरयत। (3 अंक)

क. कक्षायां (39) ----------- छात्राः सन्ति।

ख. मम गृहस्य पृष्ठतः (4) -------- वृक्षाः सन्ति ।

ग. मम विद्यालये (48) ----------- अध्यापकाः सन्ति ।

खण्ड 'घ' पठित अवबोधनम्

10. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत। (4 अंक)

तक्षशिलायाम् एकः ब्राह्मणः आसीत्। तस्य नाम चाणक्यः आसीत् । सः कृष्णवर्णः , कृशशरीरः,खल्वाटः, शिरसि दीर्घशिखः, स्थूलौष्ठः, अत्यंतकुरूपः परन्तु बुद्धिकौशले अप्रतिमः आसीत् ।एकदा मगधदेशस्य नृपः नन्दः तम् अपमानितं कृत्वा सभायाः बहिः निष्कासितवान् ।एतेन अपमानेन सः क्रुद्धः भूत्वा प्रतिज्ञाम् अकरोत् - "यावत् अहं नन्दवंशं न नंक्ष्यामि तावत् शिखां न भन्तस्यामि ।" एतत् निश्चयं कृत्वा सः एकं योग्यं युवकम् अन्वेष्टुं गृहात् निर्गतः ।

अ) एकपदेन उत्तरत -

क. मगधदेशस्य नृपःकः आसीत् ?

ख. कः चाणक्यम् सभायाः बहिः निष्कासितवान् ?

आ) पूर्णवाक्येन उत्तरत -

क. चाणक्यः कुत्र अवसत् ?

इ) भाषिककार्यम् -

क. ' एकः ब्राह्मणः आसीत् ।' अस्मिन् वाक्ये कर्तृपदं किम् ?

1. एकः 2. ब्राह्मणः 3. आसीत्

ख. ' निष्कासितवान् ' इत्यस्मिन् पदे कः प्रत्ययः ?

1. क्त्वा 2.क्त 3. क्तवतु

11. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत। (4 अंक)

विद्वत्वं च नृपत्वं च नैव तुल्यं कदाचन।<br>
स्वदेशे पूज्यते राजा, विद्वान् सर्वत्र पूज्यते ।

अ) एकपदेन उत्तरत –

1. विद्वान् कुत्र पूज्यते ?

2. स्वदेशे कः पूज्यते ?

आ) पूर्णवाक्येन उत्तरत –

1. नृपत्वं विद्वत्वं कथं न तुलनीयम् ?

इ) भाषिककार्यम् –

1. 'राजा' इति कर्तृपदस्य क्रियापदं किम् ?

क. स्वदेशे ख. पूज्यते ग. सर्वत्र

11. रेखांकित पदानि आधृत्य प्रश्ननिर्माणं कुरुत। (3 अंक)

अ) नीचेषु कृतम् उपकारं व्यर्थम्।

आ) स्वराज्यस्य तृणमपि न दास्यामि ।

इ) कुक्कुरः व्याघ्रात् त्रस्यते ।

12 अधोलिखितस्य श्लोकस्य अन्वयं पूरयत । (2 अंक)

विद्या ददाति विनयं, विनयाद्याति पात्रताम् ।

पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम् ।

अन्वयः - विद्या (1) ----------- ददाति, (2) ------------- पात्रतां याति। (3) ---------- धनम् आप्नोति, (4) --------धर्मं ततः सुखम् (भवति)।

मञ्जूषा – पात्रत्वात् , धनात्, विनयात्, विनयं।

13 घटनाक्रमानुसारं वाक्यानि संयोज्य पुनः लिखत। (4 अंक)

1. तस्य शिशुपुत्रः उदयसिंहः राज्ञः पदे अभिषिक्तः।
2. पन्ना स्वपुत्रम् उदयसिंहस्य स्थाने अस्थापयत्।
3. धन्यः पन्नाधात्र्याः अनुपमः त्यागः।
4. राणा संग्रामसिंहस्य स्वर्गवासः अभवत् ।
5. चंदनः हतः उदयः सुरक्षितः निर्गतः।
6. राज्यस्य कृते बनवीरः उदयं हन्तुम् ऐच्छत्।
7. युवा भूत्वा उदयः बनवीरं मारयित्वा राज्यं प्राप्तवान्।
8. बनवीरः तस्य संरक्षकः नियुक्तः।